भाषितः ४। एकतालो भवेत् शेषः क्रमेणापि चतुष्टयम्। शेषशून्यं गजनञ्च सर्वतो मुनिभाषितम्५। प्रथमं युगलञ्चैव तत्परं तालमेककम्। शेषे युग्मं तथा शून्यं पञ्चतालं प्रकीर्त्तितम् ६। युगलं प्रथमं तालं तत्परन्त्वेकशून्यकम्। शेषे च युगलं तालं रूपकं परिकीर्त्तितम्७। एकतालं तथा शून्यं क्रमेण द्विविधं भवेत्। शेषे युगलतालञ्च समतालं भवेत् परम् ८।"

रुद्रतालभेदलक्षणादि "एकतालं तथा शून्यं क्रमेण त्रिविधं भवेत्। तत्परं युगलं ताल इत्येव वीरविक्रमः१। युग्मतालं तथा शून्यं तत्परं द्वयतालकम्। शेषे च युगलं तालं समुद्रविषमं स्मृतम् २। युग्मतालञ्च शून्यञ्च एकतालञ्च तत्परे। शेषैकत्र त्रिशून्यञ्च विषमं चरणं भवेत् ३। एकतालं तथा शून्यं क्रमेणापि त्रिधा भवेत्। युगलं युगलं पश्चात् स वीरदशकः स्मृतः ४। प्रथममेकतालञ्च तत्परं शून्यमेककम्। शेषैकत्र त्रितालञ्च मण्डूकस्य गतिर्यथा ५। समतालं यथा दृष्टं तथा कन्दर्पसंज्ञितम्। समताले भवेत् शून्यं कन्दर्पे नास्ति, तत्पुनः ६। पञ्चतालात् परं शून्यं डाँशपाहिड़ुसुत्तमम्। अन्त्यूर्द्धञ्च भवेत् त्रस्तं संग्रामस्य यथा गतिः ७। एकतालं तथा शून्यं क्रमेणापि द्विधा भवेत्। शेषैकत्र त्रितालञ्च ध्रुवचरणभाषितम् ८। एकतालं एकशून्यमित्येवञ्च भवेत् क्रमात्। विरामे एकतालञ्च वागभेदे दशकोषिका ९। युगलं युगलं पश्चात् तदन्त्येकतालकम्। शेषे च युग्मं शून्यञ्च गजेन्द्रगुरुभाषितम् १० युग्मशून्यं विरामे च एकतालं भवेत् क्रमे। छुटकाख्यानकं धीरं सङ्गीतपरिनिष्ठितम्११।"

ब्रह्मतालभेदलक्षणानि। "युगञ्च त्रस्तं प्रथमैकतालं किञ्चिद्विरामे पुनरेकतालम्। ब्रह्माख्यतालञ्च सुगीतमध्ये यथा कपोती हि करोति शब्दम् १। युग्मतालं भवेद्त्रस्तं एकतालञ्च तत्परे। शेषे द्वितीयशून्ये च विरामब्रह्मतालकम् २। प्रथमञ्चैकतालञ्च युग्मशून्यं तथा परे। शेषैकत्र त्रितालेति षट्कला खलु कथ्यते ३। आदौ युग्मं तथा युग्मं त्रितालञ्च तथा परे। सप्तमात्रा भवत्येषा ब्रह्मतालान्तरे शुभे४।"

इन्द्रतालभेदलक्षणानि "सविरामं त्रितालञ्च एकशून्यन्तथापरे। शेषे त्रस्तं त्रितालञ्च देवसार इतीर्य्यते१। द्वितीयशून्यं विरामे भवति ततश्च त्रितालानि। शेषेण द्विशून्यमित्येवं देवचाली २। प्रथममेव युग्मतालं तत्पश्चादेक शून्यविरामे। शेषे त्रितयतालं भवतीति मदनदोलेति। युग्मतालं समारभ्य पञ्चतालं भवेत्तथा। अन्यूर्द्धञ्च तथा त्रस्तं गुरु गन्धर्व ईरितः ४। श्रावणस्य यथा धारा तथा तालो भवेद्घनः। पञ्चतालान्तराणीति पञ्चालीति प्रकीर्त्तिता ५ सविरामं चतुस्तालं त्रितालं शून्यमन्ततः। मेघारम्भे यथा केका ध्वयन्ते इन्द्रभाषितः ६।"

चतुर्दशतालभेदलक्षणानि "एकतालञ्च शून्यञ्च क्रमेण त्रितयं ततः। शेषे चतुष्टयं त्रस्तं चिक्कताल इतीर्य्यते१। एकचन्द्रस्तथा युग्मं तालं प्रत्येकतस्त्रयम्। शेषे त्रीणि च शून्यानि चन्द्रमाला भवेत्परा २। प्रथमं षट्कतालञ्च अन्त्यूर्द्धन्तु भवेत् क्रमात्। शेषे युग्मं तथा शून्यं देवमाला च सोच्यते३। चन्द्रशून्यं त्रितालञ्च विरामेण क्रमेण तु। अन्त्यूर्द्धन्तु भवत्येवमङ्गज्योतिरिति स्थितिः ४। एकैकतालान्तरयुग्मतालात् शून्यत्रयं तत्परमेकतालम्। कलाभिदा शून्यभिदा समाख्या स स्वर्गसाराख्यनवीनतालः ५। युग्मशून्यं विरामेण देवतालमिति क्रमात्। धमाष्टाख्योऽन्तरे शून्यमिति सर्वत्र भाषितम् ६। नवाम्बुदे रासिनि शीघ्रयानं तथा सुसंवद्धसुतानभानम्। युग्मं सत्रस्तं क्रमतश्च तालं शेषे त्रितालञ्च धराधराख्या ७। एकतालञ्च शून्यञ्च क्रमेणापि चतुष्टयम्। क्रमात्तालत्रयञ्चैव वसन्तवागुदाहृता ८। सविरामं द्वयं तालं युग्मतालं तथा परे। शेषैकत्र त्रितालञ्च भवेत् काककलेति सा ९। त्रितालञ्च भवेद् त्रस्तं तत्परं त्वेकतालकम्। शेषेऽपि च त्रितालञ्चेत् कोरशब्दा प्रचक्ष्यते१०। युग्मं युग्मं तथा युग्मं तालन्त्वेकं भवेत् क्रमात्। शेषे शून्यं कलाभेदे ताण्डवीति भवेत् पृथक् ११। सविरामं द्वयं तालं युग्मशून्यञ्च तत्परम्। शेषोर्द्धन्तु त्रितालञ्च हर्षधारा प्रकीर्त्तिता १२। चन्द्रशून्यं विरामेण द्वयं तालं भवेत् क्रमात्। अन्त्यूर्द्धन्तु भवेद् त्रस्तं भाषाख्यं तालमुत्तमम् १३। अन्त्यूर्द्धन्तु त्रितालञ्च द्वयं तालं विरामकम्। इत्यङ्गमाला विज्ञेया सङ्गीता भुवि सर्वतः"१४ सङ्गीतदामोदरे ४स्तवकम्"।

तालस्येदम् तस्या० अञ्। "पानसं द्राक्षमाधुकं खार्जुरं तालमैक्षवम्" प्रा० त्रि० पुलस्त्योक्ते ११ मद्यभेदे न०

**तालक** न० चु० तड–घञ् संज्ञायां क डस्य लः। १हरिताले राजनि० २द्वारकपाटरोधनयन्त्रे (ताला) हेमच०। ३तुवरिकायां(अरहर)शब्दर०। स्वार्थे क। ४ताले इत्यादौ